Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 6 | ISSN : 2582-0095

# शिक्षकाणां समग्रगुणवत्ताप्रबन्धनपरकवृत्तिविकासोपायाः

डॉ. विजय कुमार दाधीचः
सहायकाचार्यः, (शिक्षाशास्त्रम्)
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्।

**Article Info**
Volume 5, Issue 6
Page Number : 65-70

**Publication Issue :**
November-December-2022

**Article History**
Accepted : 01 Dec 2022
Published : 15 Dec 2022

**शोधसारांशः**- लेखेऽस्मिन् शिक्षणवृत्त्याः विकाससम्बन्धितान् वर्तमानान् यथार्थसन्दर्भान् च स्पष्टयितुं प्रयासः कृतः। यस्मिन् शिक्षकाणां वृत्तिविकासस्य तात्पर्य-पार्श्व-मार्गानुभवजनितावलोकनरूपाः निष्कर्षात्मकविश्लेषणसदृशाः पक्षाः सम्मेलिताः। एतेषां पक्षाणां विवेचनेन स्पष्टं भवति यत् शिक्षणवृत्तौ अधिकांशनिवेशः शिक्षकाणां जीविकायाः प्रारम्भे एव कृतः। शिक्षा एवं शिक्षायाः सन्दर्भितोत्पादः शिक्षकाणां गुणवत्तायाः पृथक् कथं भवितुं शक्नोति? अतः शिक्षा तथा शिक्षाजगती वृत्तिविषयकं जनजागरणम्, वर्तमाने परिवर्त्यमाने गत्यात्मकुयगे च महदावश्यकं वर्तते। शिक्षकाणां जीविकाविषयकविकासदशां बोधनस्य एष एकः प्रयासोऽस्ति। यः कोऽपि एवं मन्यते यत् शिक्षकाणां जीविकाविषयकविकासस्य धारणा केवलं घटनामात्रमेव नास्ति, अपितु एकः महत्त्वगामी प्रक्रमः अस्ति। यः शिक्षकाणां ज्ञानेन, कौशलेन, अभिवृत्त्या एवं विकासेन सह तेषां प्रवृत्तीः एवं व्यवहारान् समसामयिकतायाः पटले प्रतिबध्नाति।

**कूटशब्दाः** - शिक्षकः, शिक्षणवृत्तिः, वृत्तिकविकासस्य राजमार्गाः।

"**विषयविषयकपृष्टभूमिः**'' अधुना अस्माकं देशे जीविकायाः एवं शासकीयकर्मचारीणां संकोचवशात् शिक्षकवर्गः उच्चवर्गरुपेण प्रख्यापितः। परन्तु जीविकाविषयकस्य सोपानोपरि सः अधुनाऽपि परम्परागतरूपेण सम्बद्धः अस्ति। एवं वक्तुं शक्यते यत् विकासस्य गतिशीलतायाश्च अस्मिन् समयेऽपि अस्माकं शिक्षकेषु जीविकाविषयकानुमानं नास्ति। अत्र कारणं किमपि स्यात्, परन्तु एतत्स्पष्टमस्ति यत् अस्माकं शिक्षकः शिक्षणनियुक्तेः अभिप्रायं वेतनेन वा अवगच्छति तथा अभिवृद्धिः इत्युक्ते वेतनवृद्धिं पदोन्नतिञ्च अवगच्छति। अधुना तस्य जीविकविषयकविकासे तस्य उत्पादकक्षमता, नीतिशास्त्रीयावबोधः, सामाजिकचेतना, सतत् स्वायत्तता, नेतृत्वम् सामाजिकप्रतिबद्धता, उत्तरदायित्वं, समयपरकता, वर्गाणाम् आवश्यकतानुकूलनसदृशाः च अनेके विषयाः सम्मिलिताः सन्ति। इमे अद्य शिक्षकाणां जीविकापरकजीवने प्रायः न्यूनमेव परिलक्षिताः भवन्ति। तत्रैव अपरस्मिन् पक्षे राष्ट्रस्य शैक्षिकावश्यकतां पश्यामश्चेत्, अस्मभ्यम् इतोऽपि शिक्षकाणाम् आवश्यकता वर्तते। अतः शिक्षकाणां नियुक्तिः, प्रशिक्षणं, प्रोत्साहनं एवं शिक्षणसेवायां शिक्षकजीविकायाः वर्तमानपरिदृश्यं दृष्ट्वा ज्ञायते यत् अद्य शिक्षणजीविकायाम् अधिकांशतः निवेशः शिक्षकाणां जीविकायाः आरम्भे एव कृतः भवति। कदाचित् अत एव "डेलर्स कमीशन'' (1996) इत्यस्य संस्तुतिसु उक्तं यत् वर्तमानसमाजस्य गुणवत्तापूर्णविकासाय आवश्यकं अस्ति यत् शिक्षकः स्वीयज्ञानं परिपूर्णं विकसितं कुर्यात्। एतस्मै तान् सेवायाः पूर्वं एवं सेवायाः परं स्वकीयं आजीविकायाः पूर्णतायाः प्राप्तकरणाय सततं प्रयासाः करणीयाः। "राष्ट्रियपाठ्यचर्यायाः रूपरेखा 2005 तमे वर्षेऽपि एषा वार्ताः स्वीकृता यत् "शिक्षकाणां नियुक्तिः सेवापूर्वप्रशिक्षणम्, सेवारतप्रशिक्षणम्, तथा कार्यपरिस्थितेः सम्बन्धितासु नीतिसु 1984 तमस्य वर्षस्य चट्टोपाध्यायसमितेः तेषां परामर्शाणां आभासं प्राप्तं स्यात, ये आजीविकादक्षतायाः परिष्कारस्य सम्बन्धे प्रदत्ताः आसन्।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

उपर्युक्ताः संस्तुतयः यथार्थाः अपि सन्ति, यतोहि भूमण्डलीकरणस्य युगेऽस्मिन् जीवनस्य सम्भवतः प्रत्येकं क्षेत्रं प्रतिस्पर्धाया एवं गत्यात्मकतया सम्बन्धितं जातम्। तकनीकीविकासेन सहैव संचारस्य सूचनाक्रान्तेश्व विकासः शिक्षा एवं शिक्षण–आजीविकायाः नवीनाः आवश्यकताः उत्पादितवान्। विद्यार्थिनाम् अभिभावकानां च पारिवारिकविशेषतासु परिवर्तनं जातम्। अनेन सहैव ज्ञाननिर्माणस्य धारणायाः प्रचलनं वर्द्धितम्। एतेषां तथ्यानां कारणेन विगतकतिपयवर्षेभ्यः शिक्षकाणां आजीविकाधारितविकासस्य दृष्टिकोणस्य वार्ताः आवश्यकाः सन्ति। यद्यपि शिक्षकाणां आजीविकाधारितविकासस्य अर्थं कः भवेत्? इति दृष्टिः अपूर्णा वर्तते। यतोहि शिक्षण–आजीविकां पूर्णतः वाक्कीलमिव शास्त्रीयाजीविकानां श्रेण्यां न गणयितुं शक्यते। यतोहि शिक्षा समाजस्य विषयो एव, अतः शिक्षकाणाम् आजीविकाधारितविकासस्य कस्यापि योजनायां, तस्य भावात्मकान् एवं सामाजिकपक्षान् उपेक्षयितुन्नार्हति। अस्मात् अधुना आवश्यकता एतादृशाणां आजीविकाधारितशिक्षकाणां वर्तते, ये शिक्षायाः सामाजिकसम्बन्धान् जानन्तः स्वीयां शिक्षणशैलीम् अद्यतनीयछात्राणां अधिगमशैल्यानुरूपं निर्मेयुः। अस्यां दिशि स्वीयसचेष्टताया एवं विकासात्मकतायाः दृष्टिः स्वीयाक्षुण्णस्वरूपे पूर्णा एवं परिपक्वा च स्थापनीया। शिक्षकाणां आजीविधारितविकासस्य अवधारणा एकः बहु–आयामी दृष्टिकोणोऽस्ति। यस्मिन् शिक्षकाणां सामाजिकप्रतिबद्धतया सहैव तेषां चयनं प्रशिक्षणं शैक्षणिकविकासः निरीक्षणं, आकलनं एवं वैधानिकता सदृशाः अनेके विषयाः समाविष्टाः सन्ति। राष्ट्रिया शिक्षानीतिः (1986) एवं आर्थिक नीतिः (1991) इत्यस्य क्रमे भारतीयशिक्षायाम् समता, क्षमता, दक्षता, गुणवत्ता, स्वायत्तता, सर्वेषां सहयोगः, समावेशनं, निजीकरणं, वैधानिकरणे नवाचारः, सूचना एवं तकनीक्या सह राष्ट्रियशिक्षकमानकदक्षताः सदृशाः अनेके बिन्दवः प्रचलिताः सन्ति। अतः वयं वक्तुं शक्नुमः, यत् अन्यासां आजीविकानामिव शिक्षकाजीविकायाः अपि स्वीया नैतिकता एवं मूल्यानि सन्ति।

केल्डर हेड एवं डोब्नी महोदयोः शिक्षकाजीविकायाः धारणायाम् अर्जितज्ञानेन उपभोक्तायाः सेवा एवं तेन सह विशिष्टसम्बन्धस्थापनकरणस्य प्रवृत्तिः नीति, मूल्यैः एवं दिशापरकन्यायेन ज्ञानेन सह राज्यं एवं वाणिज्यस्य च प्रमाणेन तस्य आजीविकाधारितनिर्णयाणां स्वतन्त्रतासदृशाः विषयाः सम्मिलिताः सन्ति। राष्ट्रिय अध्यापकशिक्षापरिषद् (2009) एवं 2014 अध्यानाध्यापयोः प्रक्रियायां परिवर्तनं स्वीकृत्य शिक्षकाणां सतततजीविकाधारितविकासस्य नेतृत्त्वस्य कार्यबलस्य च महत्त्वोपरि बलं दत्तम्। उक्तं यत् वृत्याश्रितविकासः व्यावसायिकदक्षतायाः कृते जीवनपर्यन्तं प्रचल्यमाना प्रक्रिया वर्तते। एतेषां सर्वेषां सन्दर्भाणां विवेचनस्य च एकमेव तथ्यं प्रस्फुटितं भवति यत् गत्याः एवं परिवर्तनस्यास्मिन् समये शिक्षकेषु आजीविकादृष्टिकोणः अद्यतनसमयस्य महती आवश्यकता वर्तते। अतः शिक्षायां शिक्षाजगति च वृत्याश्रितचेतनायाः घोषः, एकः समसायिकः उपक्रमोऽस्ति यस्मात् शिक्षकाणां न केवलम् अर्थपक्षः दृढीभवति, अपितु तेषाम् आत्मसम्मानं सर्वदा उच्चं भविष्यति।

**"वृत्याश्रितविकासस्य अभिप्रायः"**

एकस्य शिक्षकस्य वृत्याश्रितविकासो विषयवस्तुनः, कक्षायाः, विद्यालयस्य समाजस्य च आवश्यकतया च भवति। एतद् सत्यम् अस्ति यत् शिक्षणाजीविकायां आगमनात्पूर्वं दीर्घकालीन–अधिगमप्रक्रियायां प्रविश्य विशिष्टज्ञानं, प्रशिक्षणं कार्यानुभवञ्च अर्जित करणीयं भवति। सहैव एतदपि सत्यमस्ति यत् आर्थिकप्रतिफलस्य विनिमये शिक्षणवृत्तिः वैयक्तिकं एवं सामाजिकदृष्ट्या महत्त्वपूर्णावश्यकतानां पूर्तिं करोति। अस्माभिः अत्र एतद् ज्ञातव्यं यत् शिक्षणं एका विशिष्टा महत्वपूर्णा च आजीविका वर्तते। तस्यां व्यक्तिगतविशेषताः सन्ति, अतः वयं एतां पूर्णाजीविकायाः श्रेण्यां न स्थातुं शक्नुमः। व्यवहारे शिक्षणं एकः वेतनभोगी वृत्तिसमूहः वर्तते। यः पूर्वनिर्धारितान् पाठ्यक्रमान् कक्षासु पाठयति। अध्यापनं एवं मूल्यांकनं विहाय अस्यां दिशि अन्ये नियमाः तं सुसिद्धाः मिलन्ति। प्रायः शिक्षणवृत्तौ शिक्षकः सामूहिकरूपेण अन्तः क्रियाः करोति। अतः तस्य

गुणवत्ताया: आकलनं कठिनम् अस्ति। सहैव एतदपि निर्धारणकरणं कठिनं कार्यं अस्ति यत् कस्यापि शिक्षकस्य तस्य विद्यार्थिनां समग्रविकासे कियत् प्रभाव: अभवत्?

वर्तमानपरिवेशं दृष्ट्वा इदानीं पुष्टरूपेण अनुभूयते यत् शिक्षणवृत्तौ अपि "वृत्याधारितसंस्कृते:" विकास: स्यात्। अत: अद्यतनीयेषु शिक्षकेषु स्वमूलाङ्कनस्य एवं आत्मालोचनाया: दृष्टिकोणविकसितकरणं आवश्यकं अस्ति, येन तेषु स्वकीयसमक्षे मानकं एवं नीतिशास्त्रीयावबोधो उत्पद्येत। येन अस्माकं शिक्षकबान्धवा: स्वयं मात्रं वेतनभोगिन्या: पदोन्नते: दृष्ट्या वृत्याश्रितक्षमताया: एवं प्रतिबद्धताया: दृष्ट्या पश्येयु:। अद्य शिक्षायां व्यापरीकरणं गृहीयाध्ययनं (होम स्कूलिंग) तथा अन्यत्र (कॉमन स्कूल सिस्टम) संयुक्तविद्यालयीयव्यवस्था, सर्वेभ्य: शिक्षाधिकार: एवं राष्ट्रियदक्षतासदृश्य: अवधारणा: शिक्षाया: सामाजिकसम्बन्धोपरि बलं ददति।

अत: शिक्षणवृत्ते: वृत्याधारितदृष्टकोण: अद्य राष्ट्रियाणां एवं सामाजिकानां प्रतिबद्धतानां वैयक्तिकार्थिकलाभानां विकासां च मध्ये संतुलनस्य पक्षधर: अस्ति।

शिक्षायां वैश्वीकरणस्य, निजीकरणस्य, तकनीकीकरणस्य च अवधारणा: एतद् इंगितं कुर्वन्ति। यतोहि अन्ततोगत्वा शिक्षणं एक: संगठनं अस्ति, अत: शिक्षणं वृतित्त्वेन विकसितकरणस्य उत्साहे अस्मान् सामाजिकप्रतिबद्धतानां अनिवार्यपक्षस्य विस्मरणं न भाव्यम्। अद्यापि शिक्षकाणां स्कन्धेषु अनेकेषां सामाजिकदायित्त्वानां भारोऽस्ति। तथापि यदि पश्याम: चेत् विद्यार्थीणां सर्वाङ्गीणविकास: एव शिक्षकाणां प्रमुखा वृत्ति: वर्तते। अत: शिक्षकाणां वृत्याश्रितविकासस्य काऽपि योजना विद्यार्थिनां सन्दर्भं विहाय भवितुन्नार्हति। अत: छात्राणां (विद्यार्थीणां) सन्तुष्टे: विकासस्य च स्तर: एव वृत्याश्रितस्य विकासस्य सफलताया: अत्यन्तसमीपवर्ती एव।

**शिक्षकाणां वृत्तिविकासस्य विविधपक्षा:-** शिक्षकाणां वृत्तिविकासस्य एतेषां पक्षाणां अवलोकनेन स्पष्टं भवति यत् वृत्तिविकासस्यावधारणायां संरचना, सम्बद्धता एवं सततधारा सदृशा: गुणा: अपेक्षिताश्च सन्ति। अत: अस्मिन् सन्दर्भे शिक्षासंस्थानेषु सततावबोधनस्यावसर:, वृत्तिकविकासस्य पन्थान:, नेतृत्वस्यावसरा:, स्वायत्तता एवं तन्त्रपारदर्शितया सहैव विधिना सहसम्बन्धितै: पक्षै: अन्त:क्रियाया: अवसरा: सर्वदा उपलब्धा: स्यु:। तदा शिक्षक: स्वीयवृत्तिकविकासस्य सूचकान् अवगन्तुं शक्नोति। अत: वृत्तिकविकासस्य विविधपक्षान् व्यापक प्रसारितं कृत्वा सतत एवं अक्षुण्ण स्वरूपे वृत्तिकविकासस्य एक: व्यापक: सुपरिभाषितश्च कार्यक्रम: विकसित: करणीय:। तदा कदाचित् अस्माकं शिक्षकसमुदाय: अद्यतनं समकालीनं भवितुमर्हति।




**शिक्षकाणां वृत्तिकविकासस्य राजमार्गा:**

- ❖ समकक्षजनैः सह अन्तः क्रिया एव आदानप्रदानम्।
- ❖ सतताध्ययनं लेखनञ्च।
- ❖ परिवर्तितशैक्षिकसन्दर्भान् प्रति जागरूकता (चैतन्यता)
- ❖ समये-समये आत्मनिरीक्षणं आकनञ्च।
- ❖ कार्यशालासु संगोष्ठीषु च सहभागिता।
- ❖ अन्तर्जालशिक्षणं एवं अन्तर्जालस्य वृत्तिकप्रयोगः।
- ❖ हितकारीवर्गाणां (स्तेक होल्डर्स) अपेक्षाः प्रति संवेदनशीलता।
- ❖ शिक्षणवृत्तेः मानकमूल्यानां राष्ट्रियापेक्षानाञ्च सततं मानं ज्ञानञ्च।
- ❖ आलोचनात्मकं अन्वेषणम्।
- ❖ परिवर्तनं प्रति सकारात्मकता।
- ❖ स्वाध्यायस्य सूचनायाश्च स्रोतभिः सतत सम्बन्धः सर्जनात्मकतायाः समर्थनम्।
- ❖ अभिविन्यासः पाठ्यक्रमः।
- ❖ पुनश्चर्या पाठ्यक्रमः।
- ❖ शिक्षायाः शिक्षणस्य सम्बन्धितः विशेषः पाठ्यक्रमः।
- ❖ दूरस्थशिक्षायाः कार्यक्रमेषु सहभागिता।
- ❖ सेवारतप्रशिक्षणशिविरम्।
- ❖ केन्द्रस्य राजयाणाञ्च प्रशिक्षणाभिकरणानां कार्यक्रमेषु सहभागिता।
- ❖ वृत्तिक संद्यानां प्रशिक्षणकार्यक्रमेषु सहभागिता।
- ❖ शिक्षासमितेः एवं विश्वविद्यालयानां च आकादमिकप्रशिक्षणकेन्द्राणां कार्यक्रमेषु सहभागिता।
- ❖ सामयिकशैक्षिकजनजनकार्यक्रमाणां प्रशिक्षणशिविरेषु सहभागिता।
- ❖
- ❖

शिक्षकेषु वृत्तिकविकासस्य दृष्ट्या उक्तं स्रोतसां आवश्यकतानुसारं प्रयोगं कृत्वा एकः तादृशः परिवेशः उत्पादनीयः, येन प्रत्येकं शिक्षके दक्षता, कला, ज्ञानम् एवं आत्मविश्वासस्य स्तरः तावत् वर्द्धेत् यत् सः निष्क्रियः ग्रहणकर्तुः स्थाने सक्रिय सहभागी भवेत्। अस्मात् कारणात् शिक्षणसंस्थानेषु एतादृशी गतिशीला व्यवस्था प्रतिबन्धिता स्यात्। या विकासस्य विविधैः मार्गैः सह मूल्यांकनस्य एवं पृष्ठपोषणस्य सततस्वरूपप्रदानं कुर्यात्। स्पष्टमस्ति यत् एतत्प्रकारकाणां गतिविधीनां कारणेन शिक्षकेषु वृत्तिकपरिपक्वतया सह सभ्यताकारी दृष्टिकोणाः विकसिताः भविष्यन्ति। अस्य तथ्यस्य पुष्टिः राष्ट्रियशैक्षिकानुसन्धानेन तथा प्रशिक्षणपरिषदा अन्यैः संगठनैश्च – "भारतीयशिक्षायाः गुणवत्तायां कार्यभाणानां अनुसन्धानानां निष्कर्षत्वेनापि यत् शिक्षकाणां वृत्तिविकासदृष्ट्या प्रबन्धितसततशिक्षा एवं प्रशिक्षणस्तरः विद्यार्थिनां अधिगमस्तरं प्रभावयति। साररूपेण वक्तुं शक्यते यत् शिक्षकान् स्वीयशिक्षकत्वं यथावत् करणाय स्वकीय वृत्तिकविकासस्य राजमार्गेषु सतत् गमनागमनं करणीयम्। तदा कदाचित् तेषां वृत्तिः एकः समाजोपयोगी आगमः भवितुर्हति।

**वृत्तिकविकासस्य प्रमुखावलोकनम्**– शिक्षकाणां वृत्तिकविकासस्य समग्रेषु कार्यक्रमेषु ज्ञान-विज्ञानं सततं एवं सहजाधिगमः, पारदर्शिता, स्वायत्तता, एवं उत्तरदायित्वं सदृशाः घटकाः सम्मिलिताः भवेयुः। येषां आलोके शिक्षकबान्धवः स्वप्रेरितोत्तरदायित्वस्य अनुभवं कुर्वन्तः समाजाय आवश्यससेवार्थिनः भवेयुः। विचारदर्शनस्य अनया धारणया स्पष्टयति यत्

शिक्षकाणां वृत्तिकविकासस्य केचन वैयक्तिकाभिप्रायाः सन्ति। येषां समाधानं विना शिक्षकाणां वृत्तिकविकासः असम्भवो तु नास्ति, परन्तु कठिनं अवश्यं वर्तते। अस्यां दिशि केषाञ्चन अनुभवजन्यानाम् अभिप्रायाणां परिचयः निम्नवत् वर्तते।

- ❖ वृत्तिकविकासकार्यक्रमस्य अधीने शिक्षकाणां गणवेशः, शारीरिकचेष्टाः, वाक्स्पष्टता, वाक्पटुता, विषयानुकूलभाषा एवं शब्दानां प्रयोगेण सहै सामान्याभासाः शिक्षणवृत्तेः अनुकूलाः स्युः।
- ❖ शिक्षकाणां वृत्तिकविकासस्य कार्यक्रमेषु शिक्षकाणां उपस्थितिः एवं समयबद्धतायाः दृष्टिकोणः, पूर्णपरिपक्वता, एवं संश्रेष्ठं स्युः।
- ❖ वृत्तिकविकासस्य दृष्ट्या शिक्षकेषु स्वीयवृत्तिं प्रति उत्साह एवं प्रतिबद्धतायाः स्वरूपं सदैव उच्चकोट्याः भवेत्।
- ❖ शिक्षकवृत्तौ अवकाशस्य बहुलता भवति, अतः अवकाशस्य प्रयोगः वृत्तिकविकासस्य धारणय कारयेत्।
- ❖ शिक्षकाणां वृत्तिकविकास्य कार्यक्रमेषु विद्यार्थीनां समग्रसन्दर्भस्य अवबोधाः आवश्यक समावेशितः करणीयः।
- ❖ विद्यालयानां परिवेषे वृत्तिकविकास्य मार्गान् स्रोतांसि प्रति जागरुकता दृष्टिकोणं सततस्वरूपे प्रतिबन्धित
- ❖ शिक्षणवृत्तिविकासस्य निर्देशनीयान् उपगामान् शैक्षिक संस्थानस्य तन्त्रागमस्वरूपे प्रभाविदृष्ट्या एवं निर्बाध दृष्ट्या च विकसितं प्रतिबन्धितं च करणीयम्।
- ❖ संस्थाने एतादृशानां विमर्शाणां सततप्रसारः संवर्धनञ्च करणीयम् यच्छिक्षकेषु संक्रियतायाः एवं परस्परं सहयोगस्य एवं निर्भरतायाः वातावरणम् उत्पादयेत्।
- ❖ शैक्षिकसंस्थानेषु सूचनायाः एवं सम्प्रेषणतकनीक्या सह वृत्तिकविकासस्य मार्गान् अनुभवाश्च आदानप्रदानप्रवृत्तीः वर्द्धनं स्यात्।
- ❖ एतद् द्रष्टव्यम् यत् शिक्षकाणां वृत्तिसकविकासश्च कार्यक्रमाः शिक्षणां राष्ट्रियदक्षताभिः तादात्म्याः सन्ति न वा।
- ❖ एतदपि द्रष्टव्यम् अस्माकं वृत्तिकविकासकार्यक्रमैः शिक्षकगणः आत्मानं गौरवान्तिः, उत्तरदायी, एवं स्वायत्तरूपेण अनुभवन्ति न वा।
- ❖ वृत्तिकशिक्षकाणां सम्बन्धः सम्पूर्णविद्यालयेन तन्त्रेण वा भवेत् न तु एककक्षया विशिष्ट विषयेण वा।
- ❖ वृत्तिकशिक्षकाणां कृते विद्यालयानां विविधता उत्सवः स्यात् न तु भारः।
- ❖ संस्थानस्य परिवेशे शिक्षणवृत्तेः संस्कृतेः नीतिशास्त्रस्य च अवबोधस्य सम्मानस्य दृष्टिकोणः सर्वदा परिलक्षितो भवेत्।
- ❖ शिक्षकगणाः शिक्षायाः बहु आयामी उत्पादकीयकार्याणां महत्त्वं जानीयुः। तथा स्वीयवृत्तेः समस्तकार्याणि शिक्षणस्यस माध्यमं कुर्यात्।
- ❖ शिक्षणवृत्तेः समस्त कार्याणि केन्द्रीयधुरीहितकारीवर्गाणां आशा आकांक्षा च भवितव्या।
- ❖ शिक्षणवृत्तिसंघानां दृष्टिः दलगतराजनीलतिं विहाय शिक्षकाणां वृत्तिकविकासे केन्द्रिता स्यात्।
- ❖ शिक्षकगणः समाजस्य स्वस्य च वृत्तिं प्रति सजगतां स्वकीयदायित्त्वान् केन्द्रीकृत्य अतिसम्यक् कर्तुं विश्वस्य कृते कार्यं कुयात्।

- ❖ शिक्षकाणां वृत्तिकविकासस्य कार्यक्रमेषु नवाचारः, अनुसन्धानम्, परिवर्तनशीलता कार्यसंस्कृतिः, समूहकार्यं एव सामयिकावश्यकता: उचित समर्थनं एवं प्रबलस्थानम्।

  उपर्युक्तानां सर्वेषां अवलोकनीयबिन्दूनां प्रकाशनेन स्पष्टरूपेण प्रतीयते यत् शिक्षकाणां वृत्तिकविकास: वर्तमानयुगस्य महती आवश्यकता वर्तते। अस्या: अभावे अस्माकं कृते शिक्षका: तु प्राप्तुं शक्ष्यन्ते, परन्तु तेषां शिक्षकत्वं न मिलितुं शक्ष्यते।

**निष्कर्ष**:- शिक्षाराष्ट्रय विकासे एका विशिष्टोत्पादनीया सेवा वर्तते। शैक्षिकोत्पादानां गुणवत्ताया: उपरि एव सम्पूर्णं राष्ट्रस्य उत्पादकीयप्रारूपस्य एवं तस्य स्वरूपं निर्भरं करोति। कस्यापि उत्पादनस्य गुणवताया: स्तर: तस्य उत्पत्ति: साधनात् परं भवितुर्न्नाहति। अत: स्पष्टं अस्ति यत् शिक्षा एवं तस्या: संदर्भितोत्पाद: शिक्षकाणां गुणवत्ताया: फलं वर्तते। एवं शिक्षकाणां गुणवत्ता तेषां वृत्तिकविकासस्य दृष्टे: उपरि निर्भरं करोति एतेन सहैव अद्य शिक्षयां गुणवत्तासुनिश्चितकरणस्य आवश्यकता, व्यावसायिक राष्ट्रियदक्षता, प्रतिस्पर्धा एवं भूण्डलीकरणं एतादृशा: अनेके सम्बन्धा: एतां धारणां इतोऽपि महत्त्वपूर्णां कुर्वन्त: सन्ति। अत: शिक्षकाणां वृत्तिकविकासस्य प्रक्रिया एकत: तु व्यावसायिकस्य एवं सामयिकदृष्टिकोणस्य परीक्षणेषु आधारिता स्यात्। अन्यत्र तु एतां राष्ट्रिय एवं सामाजिकोत्तरदायित्त्वानां अपेक्षाणां च अनुकूला स्यात्। तदा कदाचित् वास्तविकरूपेण शिक्षकाणां वृत्तिकविकासस्य धारणाया: उदय: भवितुमर्हति।

इत्थम् शिक्षकाणां वर्तमानस्थिते: आवश्यकताञ्च पश्यन् स्वयमेव सिद्धं अस्ति यत् शिक्षकेषु वृत्तिकचेतना अद्यतनीयादूरगामी एवं परिवर्तनशीलपरिपूर्णसमाजस्य एका महती आवश्यकता वर्तते। सम्बन्धेऽस्मिन् शिक्षाऽऽयोग: (1964-66) शिक्षकशिक्षाया: उपरि गठितस्य राष्ट्रिय आयोगस्य (1983-85) राष्ट्रियशिक्षानीति: (1986) राममूर्तिसमिति: (1990) राष्ट्रियज्ञानाऽऽयोग: (2005) राष्ट्रियपाठ्यचर्याया: रूपरेखा (2005) शिक्षाया: अधिकाराधिनियमेन (2009) सह राष्ट्रियाध्यापक शिक्षापरिषद: (नेक) सम्भवत: सर्वघोषणा: शिक्षकाणां वृत्तिकविकासस्य दृष्ट्या सेवाया: पूर्वं एवं सेवाकालीनसततशिक्षा एवं प्रशिक्षणानां सततयोजनानां संस्तुतीभि: सह शिक्षकाणां समकालीनावश्यकतानां आधारे पुनश्चर्यापाठ्यक्रमस्य, शिक्षावकाशस्य संगोष्ठीनां, कार्यशालानां एवं दिशापरकगतिविधीनां प्रावधानेषु बलं दत्तम्। एतै: सर्वै: विवेचनै: परिपुष्टं भवति यत् शिक्षकाणां वृत्तिकविकासस्य अवधारणा एक: आवश्यकताऽऽधारित: प्रक्रम: वर्तते। य: शिक्षकाणां ज्ञानं, विकास:, कौशलं, दृष्टिकोण: अभिवृत्ति: च एवं तेषां प्रवृत्तीं एवं व्यवहारान् सामयिकताया: पटले प्रबन्धितं करोति।

**सन्दर्भग्रन्था:**

1. अग्रवाल, वाई. (2001), क्वालिटी कंसर्नस इन प्राईमरी एजुकेशन इन इंडिया:वेयर इज द प्रोब्लम, नई दिल्ली, न्यूपा।
2. एन.सी.टी.ई. (2009) नेशनल करिकुलम फॉर टीचर एजुकेशन, टूवार्डस् ए ह्यूमेन एण्ड प्रोफेशन टीचर, नंइ दिल्ली।
3. कुमार, सुरेंद्र. 2004. प्राथमिक स्तर पर शिक्षामित्रों एवं नियमित शिक्षकों की शिक्षण दक्षता का अध्ययन, रिसर्चेज एण्ड स्टडीज, शिक्षाशास्त्र विभाग, इलाहाबाद विश्वविद्यालय, इलाहाबाद।
4. शुक्ला इन्दिरा (2008), बरनोट एण्ड स्ट्रेस एमंग सेकेण्डरी स्कूल टीचर्स इन रिलेशन टू देयर टीचर इफेक्टिवनेस, ई जर्नल ऑफ आल इण्डिया, एसोशियेशन फोर एजुकेशन रीसर्च (इ.जे.ए.आई.ए.इ.आर.) वॉल्यूम 20।
5. सुखियां, एस.पी. - शैक्षिक प्रशासन, प्रबन्धन, अग्रवाल पब्लिककेशन्स, आगरा।
6. सिंह, माया शंकर - अध्यापक शिक्षा की चुनौतियाँ आर.लाल. बुक डिपो, मेरठ।
7. गुप्ता, एस.पी.- भारतीय शिक्षा का इतिहास, विकास एवं समस्यायें, शारदा पुस्तक भवन,इलहाबाद।